Roll No. ....................................

Total No. of Questions : **19**

Total No. of Printed Pages : **8**

# R-206

## High School, Examination - 2017

## संस्कृत (सामान्य)

## SANSKRIT (General)

Time : **3** Hours ] [ Maximum Marks : **100**

---

निर्देशः – (i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः ।

1 उचितविकल्पं चित्वा लिखत – **1×5=5**

(क) 'महेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) दीर्घ सन्धिः (ब) गुण सन्धिः

(स) वृद्धि सन्धिः (द) अयादि सन्धिः

(ख) 'निस् + छलः' इत्यस्य सन्धिः अस्ति –

(अ) निस्छलः (ब) निशछलः

(स) निषछलः (द) निश्छलः

(ग) 'विसर्ग सन्धेः' उदाहरणमस्ति –

(अ) षडाननः (ब) तच्छीलः

(स) प्रत्येकः (द) मनोरथः

(घ) 'जगदीशः' इत्यस्य पदस्य सन्धिविच्छेदः अस्ति –

(अ) जगत् + ईशः (ब) जग + दीशः

(स) जगत + इशः (द) जग + ईशः

(ङ) अधोलिखितेषु अव्ययम् अस्ति –

(अ) कथा (ब) करोति

(स) रूपं (द) कदा



https://www.evidyarthi.in/

2 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) द्विगुः समासस्य उदाहरणम् अस्ति –

(अ) उपगङ्गम् (ब) त्रिभुवनम्

(स) प्रतिदिनम् (द) दशाननः

(ख) 'चौरभयम्' इत्यस्मिन् पदे समासः अस्ति –

(अ) द्वितीया तत्पुरुषः (ब) चतुर्थी तत्पुरुषः

(स) सप्तमी तत्पुरुषः (द) पञ्चमी तत्पुरुषः

(ग) 'परोपकारः' इति पदस्य समासविग्रहः भवति –

(अ) परोपस्य कारः (ब) परेषाम् उपकारः

(स) परेण उपकारः (द) परम् उपकारः

(घ) 'निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) निस् (ब) निर्

(स) नि (द) निध

(ङ) अधोलिखितेषु उपसर्गः अस्ति –

(अ) अस् (ब) इव

(स) अद्य (द) सम्

3 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) 'नेष्यामः' इत्यस्मिन् पदे धातुः अस्ति –

(अ) नेष्य (ब) नेस्

(स) नेष् (द) नी

(ख) 'वर्धताम्' इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) [illegible]पुरुषः (द) महापुरुषः



[ P.T.O.

https://www.evidyarthi.in/

(ग) 'द्रक्ष्यन्ति' इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकारः (ब) लोट् लकारः

(स) लङ् लकारः (द) लृट् लकारः

(घ) 'भवेयुः' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

(ङ) 'अहम् अपि आपणं गच्छामि' अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) अहम् (ब) अपि

(स) आपणं (द) गच्छामि

4 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) 'गुणवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) क्तवतु (ब) ल्यप्

(स) क्तिन् (द) मतुप्

(ख) 'सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) तुमुन् (ब) क्त्वा

(स) शानच् (द) शतृ

(ग) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) आप् (ब) जाप्

(स) ङाप् (द) टाप्

(घ) 'शतृ' प्रत्ययस्य उदाहरणम् अस्ति –

(अ) गतवती (ब) जेतुम्

(स) हसन् (द) गुणिन्

(ङ) .......... किल मनुष्याणां देवतानां च दैवतम् ।

(अ) माता (ब) पिता

(स) देवता (द) मनुष्यः



https://www.evidyarthi.in/

5 प्रदत्तैः शब्दैः रिक्त–स्थानपूर्तिं कुरुत – 1×5=5

(मूर्खत्वम्, पितृसमः, यशः, भूतानि, कदापि)

(क) महर्षिः ............ शरीरेण अमरः अस्ति ।

(ख) दानेन ............ वशी भवन्ति ।

(ग) ज्येष्ठो भ्राता ............ ।

(घ) स्वकर्मणि प्रवर्तितुं ............ नैव खिद्यते ।

(ङ) पठतो नास्ति ............ ।

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 6

(क) विदिशामध्ये किं नाम स्मारको वर्तते ?

(ख) रथकारः पर्वतदेशे किमर्थं गतः ?

(ग) कस्य अभिनिष्क्रमणसंस्कारः अस्ति ?

(घ) शिष्यान् कथं परीक्षेत् ?

(ङ) दयानन्दः केषां प्रचारमकरोत् ?

7 अधोलिखितेषु द्वयोः शब्दयोः शब्द–रूपाणि त्रिषु वचनेषु लिखत – 2

(क) कवि – द्वितीयाविभक्तिः

(ख) साधु – चतुर्थीविभक्तिः

(ग) राम – तृतीयाविभक्तिः

8 "त्वया" अथवा "तासाम्" इति पदस्य विभक्तिं वचनं च लिखत । 2



https://www.evidyarthi.in/

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(अ) सूर्यवंशस्य राजा सगरः आसीत् । सः एकदा अश्वमेधयागं कृतवान् । यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान् । अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत् । तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान् । ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान् । तदा मुनिः तपः कुर्वन् ध्याने आसीत् । अतः सः किमपि न ज्ञातवान् ।

(i) सूर्यवंशस्य राजा कः आसीत् ?

(ii) सः एकदा किं कृतवान् ?

(iii) यागस्य अश्वः कुत्र सञ्चारं कृतवान् ?

(iv) कः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान् ?

(v) इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान् ?

(ब) वरुणदेवः वृष्टिं वर्षति । सूर्यदेवः प्रकाशं प्रयच्छति । भूमाता वृक्षस्य आधारभूता अस्ति । वायुः अनिलं ददाति । ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च । ते न कदापि "मम अधिकारः वर्तते" इति अवदन् । ते सर्वे परोपकारिणः । परं यूयं सर्वे परोपकारिणः वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पा यूयं स्वाश्रयमेव नाशयथ । अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गच्छथ ?

(i) कः वृष्टिं वर्षति ?

(ii) सूर्यदेवः किं प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) कः अनिलं ददाति ?

(v) के परोपकारिणः ?

(स) "सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत् ।" अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते। सा "संस्कृतमेवराष्ट्रभाषाभवितुम् अर्हति" इत्युक्तवती । अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः महनीयतां च स्वीकृतवन्तः । यथा प्रथमः राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः कथितवान् यत् "संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति" ।

(i) सरल संस्कृतमेव भारतराष्ट्रस्य किं भवेत् ?

(ii) प्रसिद्धा नायकाः कस्य प्रशंसां कृतवन्तः ?

(iii) भारतस्य प्रथमराष्ट्रपतिः कः आसीत् ?

(iv) संस्कृतसाहित्यं मानवजातेः कृते किं अस्ति ?

(v) 'कथितवान्' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक् कुरुत ।



https://www.evidyarthi.in/

10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(अ) ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥

(i) कस्य मनः दूरम् उदैति ?

(ii) कः दूरङ्गमम् अस्ति ?

(iii) ज्योतिषाम् एकं ज्योतिः कः ?

(iv) मे मनः किमस्तु ?

(v) 'शिवः' इति शब्दस्य विलोमशब्दं लिखत ।

(ब) मत्ता गजेन्द्रा मुदिता गवेन्द्रा, वनेषु विक्रान्ततराः मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः, प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥

(i) गजेन्द्राः किं अभवन् ?

(ii) सुरेन्द्रः कैः सह प्रक्रीडितः ?

(iii) वर्षाकाले मृगेन्द्राः कीदृशाः भवन्ति ?

(iv) गवेन्द्राः कीदृशाः भवन्ति ?

(v) 'वनेषु' इत्यस्य पदस्य विभक्तिं वचनं च लिखत ।

(स) सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वातिवायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥

(i) रविः केन तपते ?

(ii) पृथ्वी केन धार्यते ?

(iii) वायुः केन वाति ?

(iv) सर्वं कस्मिन् प्रतिष्ठितम् ?

(v) 'धार्यते' इति पदे का धातुः अस्ति ?

11 युग्ममेलनं कुरुत – 4

| 'अ' | 'आ' |
|---|---|
| (i) नानृतम् | (क) कर्त्तव्यः |
| (ii) जनः स्वकर्मण्यैव | (ख) गुरुदक्षिणार्थी |
| (iii) समयस्य सदुपयोगः | (ग) रतस्तिष्ठति |
| (iv) कौत्सः | (घ) ब्रूयात् |
| | (ङ) दानी |



https://www.evidyarthi.in/

12 शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत – 4

(क) रघुः वरतन्तुशिष्यः आसीत् ।

(ख) चञ्चलं मनः न अनुभ्रामयेत् ।

(ग) कात्यायनी सीतायै ज्ञानं दत्तवती ।

(घ) महाभारतं लक्षैकपद्यात्मकं महाकाव्यम् अस्ति ।

,3 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत – 1×4=4

(i) कस्मिन् प्रवर्तितुं कदापि न खिद्यते ?

(ii) छत्रसालस्य पितुः नाम किम् ?

(iii) भारतीयसमाजे का सदैव पूज्या अस्ति ?

(iv) अन्येषां वस्तूनाम् अपेक्षया अधिकः महत्त्वपूर्णः कः ?

(v) सर्वोत्तमं भूषणं किम् अस्ति ?

(vi) पुरुषादः कः आसीत् ?

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । 4

15 स्वप्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत । 4

अथवा

स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्राय आमन्त्रणपत्रम् संस्कृते लिखत ।

16 अधोलिखितेषु "पञ्च" अशुद्धकारकवाक्यानां शुद्धिः करणीया – 5

(i) रामः सर्पं बिभेति ।

(ii) सीता रामस्य सह वनं गता ।

(iii) रामः विद्यालयम् गच्छामि ।

(iv) गुरुं नमः ।

(v) नृपः विप्रम् धनं ददाति ।

(vi) मम दुग्धं रोचते ।



https://www.evidyarthi.in/

17 अधोलिखितवाक्यानां कथानुसारेण क्रम–संयोजनं कुरुत – 5

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।

(ख) गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म ।

(ग) शिष्यः अनन्तरदिने एव रामनाथपुरं प्रति प्रस्थितवान् ।

(घ) वासुदेवः तस्य प्रिय शिष्यः आसीत् ।

(ङ) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत – 5

सतां सज्जनानां, सङ्गतिः सम्पर्कः, संसर्गो वा सत्सङ्गतिः इति कथ्यते । वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति । सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति । स्थाने एवोक्तं – ''संसर्गजा दोषगुणा भवन्ति'' इति । अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिर्विधेया ।

(1) अस्य गद्यांशस्य शीर्षकं लिखत ।

(2) केन जनः सज्जनः भवति ?

(3) स्वसमुन्नतिम् इच्छता जनेन किं करणीयः ?

(4) गद्यांशस्यास्य सारं लिखत ।

(5) दुर्जनः शब्दस्य विलोम शब्दं लिखत ।

19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबन्धं लिखत – 10

(i) अनुशासनम् ।

(ii) मम दिनचर्या ।

(iii) अस्माकं देशः ।

(iv) संस्कृतभाषायाः महत्त्वम् ।



evidyarthi
https://www.evidyarthi.in/